www.thearyasamaj.org

फरवरी २०१२ ईसवीयाब्दः ॥ ओ३म् ॥ R.N.I. Regd. No. UPBIL/1998/1485

ज्वालापुरीय – गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

❋ 'भारते भातु भारती' ❋

## ❋ यज्ञमयो भगवान् ❋

स्वाामीनारायणमुनिश्चतुर्वेदप्रणीतम्

(१)

अधूतो धूतानां विधिरधिकृतानां ध्रुवनिधिः,
अजीर्णो जीर्णानां सुगणितगुणानामगणितः।
अरूपो रूपाणां पदमपदभाजां प्रभुरभूः,
अभूतो भूतानामभिरमति मध्येऽवतु स नः॥

(२)

प्रवृत्तं सद्वृत्तं हविरथ निवृत्तं शुभदिशां,
चतुःखण्डोऽखण्डो ज्वलदनलचण्डो रविरहो।
महेशो मन्त्रेशो मखपतिरवेषोऽत्र विदितः,
नभो मुण्डं कुण्डं क्रतुकृतवितुण्डं विजयते॥

(३)

प्रसादो दुस्साधो ममगत विषादो भगवतः,
प्रभूतः सम्भूतः कथमपि न पूतः समभवत्।
सदानन्दोऽमंदो महितगुणवृन्दोऽसि भगवन्,
त्वदायत्तं यत्त्वं निजशिशुमहत्त्वं गणयसे॥

(४)

मुधा धावं धावं विविधजनुभावं त्वहमितः,
भवां स्थायं स्थायं स्वयमतिथिकायं कथमहो।
इदं ध्यायं ध्यायं स्मरति च ममायं न विभवः,
यतः कारं कारं विकिरति विकारं बत मनः॥

(५)

अभारं साभारं भजसि भयभारं भवभृतम्,
जगद्धारं धारं धरणिधरधारं धृतिधर।
असारं संसारं सृजसि सुखसारं त्वमिह नः,
वयं वारं वारं निजकृतविकारं हि वृणुमः॥

(६)

सजीवं निर्जीवं जगदुभयजीवं जनयतः,
अमानं स्वात्मानं पुनरनभिमानं निलयतः।
अतोलं भूगोलं गलितनिजगोलं कलयतः,
अपादौ सर्वादौ स्मृतिकृतसुपादौ तव भजे॥

www.thearyasamaj.org

दूरभाषः- ०१३३४-२५४२९५, २५५३७७ (ज्वालापुरम्) तारगृहम्- महाविद्यालयः (ज्वालापुरम्)

# भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम्-१०२ अङ्कः- ८

**सम्पादकः**
डॉ. हरिगोपालशास्त्री
व्याकरणाचार्यः
एम.ए., पी-एच.डी.
राष्ट्रपति-पुरस्कृतः

**सह-सम्पादकः**
डॉ. केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम.ए., पी-एच.डी.

**प्रबन्ध-सम्पादकः**
डॉ. अजयकौशिकः
साहित्याचार्यः
एम.ए., पी-एच.डी.

**प्रकाशकः**
गुरुकुलमहाविद्यालयो ज्वालापुरम्
हरिद्वारम्- २४९४०४
(उत्तराखण्ड-प्रदेशः)

**शुल्क-विवरणम्**
प्रत्यङ्कम्- ५/-
वार्षिकम्- ५०/-
आजीवनम्- ५००/-

# विषयानुक्रमणिका

| | | |
|---|---|---|
| १. श्रुति-सुधा | -महर्षिदयानन्दसरस्वती | ३ |
| २. यज्ञे पशुवधो वेदविरुद्धः | -आचार्यप्रवरः श्रीनरदेवशास्त्रिवेदतीर्थः | ४ |
| ३. वेदानां वैशिष्ट्यम् | -श्री शिवपूजनशास्त्री | ९ |
| ४. वेदमर्मज्ञाः भारतीयाः पाश्चात्याश्च विपश्चितः | -डॉ० कपिलदेवद्विवेदी, | १० |
| ५. यस्यच्छायाऽमृतम् | -श्रीरामदत्तशास्त्री | १८ |
| ६. ऋषिदयानन्दः | -आचार्यसन्दीपकुमारत्यागी 'दीपः' | १९ |
| ७. वेदस्यास्ति विशेषतत्त्वमहिमा | -श्री वासुदेवपाण्डेयः | २० |

राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्

भारतोदयः (संस्कृत-मासिकम्)

(RNI Regd. No. UPBIL/1998/1485)

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केत सह मुद्रकस्य प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः, ज्वालापुरम् हरिद्वारम्- २४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, हरिद्वारम्- २४९४०४ (उत्तराखण्डम्) |

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषायामि यदुपरिलितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

www.thearyasamaj.org

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भाविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी ।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशाम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

| वर्षम्- १०२ | फाल्गुन २०६८ विक्रमाब्दः ❋ फरवरी २०१२ ईस्वीयाब्दः | अङ्कः- ८ |
|---|---|---|

## श्रुति-सुधा

ओ३म् वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत् सुतस्य।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥

-ऋग्वेदः १।३२।३

पदार्थः-

(वृषायमाणः) वृष इवाचरन्। (आवृणीत) स्वीकरोति। अत्र लडर्थे लङ्। (सोमम्) सूयत उत्पद्यते यः, तं रसम्। (त्रिकद्रुकेषु) त्रय उत्पत्तिस्थितिप्रलयाख्याः कद्रवो विविधकला येषां, तेषु कार्य-पदार्थेषु। अत्र कदिधातोरौणादिकः क्रुन्-प्रत्ययः, पुनः समासान्तः कप् च। (अपिबत्) स्वप्रकाशेन पिबति। अत्र लडर्थे लङ्। (सुतस्य) उत्पन्नस्य जगतो मध्ये। (आ) क्रियायोगे। (सायकम्) शस्त्रविशेषम्। (मघवा) मघं बहुविधं पूज्यं धनं यस्य सः। अत्र भूम्यर्थे 'छन्दसीवनिपौ (अ. ५.२.१०९)' इति वार्तिकेन वनिप्। (अदत्त) ददाति वा। अत्र वर्तमाने लङ्। (वज्रम्) किरणसमूहमिवास्त्रम्। (अहन्) हन्ति। वर्त्तमाने लङ्। (एनम्) मेघम्। (प्रथमजाम्) प्रथमं जायते तम्। अत्र जनसन....(अ. ३.२.६७) अनेन जनधातोर्विट् प्रत्ययः। (अहीनाम्) मेघानाम्॥३॥ अत्र वाचकलुप्तोपमालङ्कारः।

भावार्थः-

यथा वृषभो वीर्य्य-वृद्धिं कृत्वा बलिष्ठो सुखी जायते, तथैवायं सेनापतिः रसं पीत्वा बली भूत्वा सुखी जायेत। यथा सूर्य्यः स्वकिरणैर्जलमाकृष्यान्तरिक्षे स्थापित्वा वर्षयति तथा शत्रुबलान्याकृष्य स्वबलमुन्नीय प्रजासु सुखान्यभिवर्षयेत् ॥३॥

-महर्षिदयानन्दसरस्वती
(ऋग्वेदभाष्यम्, द्वितीयो भागः, २१४ पृष्ठे)

www.thearyasamaj.org

# ❋ यज्ञे पशुवधो वेदविरुद्धः ❋

-आचार्यप्रवरः श्री नरदेवशास्त्रिवेदतीर्थः

(गुरुकुलमहाविद्यालय-ज्वालापुरस्य प्राणभूताः,
विद्वत्तल्लजाः, वेदविद्यानिष्णाताः आचार्यपादाः,
भूतपूर्वकुलपतयः श्री नरदेशास्त्रिवेदतीर्थ-महाभागाः।)

ये रात्रिमनुतिष्ठन्ति, ये च भूतेषु जाग्रति। पशून् ये सर्वान् रक्षन्ति, ते न आत्मसु जाग्रति, ते नः पशुषु जाग्रति।। (अथर्व० १९।४५।५)

अत्र **'पशून् ये सर्वान् रक्षन्ति'** इत्यनेनेश्वर आज्ञापयति, मनुष्यैः सर्व एव पशवो रक्षणीया इति।

यज्ञस्य स्वरूपं किमस्तीत्युच्यते-

**द्रव्यं देवता त्यागः।।**

का.श्रौ.सू. २३

**अस्यार्थः-**

व्रीहियवादि द्रव्यम्, या तेनोच्यते सा देवता मन्त्रार्थः, अग्नावाहुतीनां दानं त्यागः। अग्न्यादि-व्यावहारिकेभ्यो देवेभ्यः संस्कृतानां व्रीहियवादीनां द्रव्यानां घृतादीनां वा वेदमन्त्रोच्चारणपूर्वकम् अग्नावाहुतिदानं **यज्ञः**।

हविस्तु क्षाराम्लतिक्तगुणादिरहितं किन्तु सुगन्धिपुष्टमिष्टरोगनाशादिगुणसहितं चतुर्विधमेव। अत्र प्रमाणम्-

**उपावसृज त्मन्या समञ्जन्,**
**देवानां पाथ ऋतुथा हवींषि।**
**वनस्पतिः शमिता देवो अग्निः,**
**स्वदन्तु हव्यं मधुना घृतेन।।**

-यजु. २९।३५, अथर्व. ५।१२।१०

**'पाथः' 'हवींषि' 'घृतेन'** सर्वाण्येतानि पदानि चतुर्विधानां द्रव्याणामेव हवनं कर्तुमुपदिशन्ति। अतस्तेषामेव ग्रहणं यज्ञे, न प्राणिवधजन्यमांसस्येति। **'मांसन्त्वशुचिद्रव्यं दुष्टश्चेति यथा च श्वमांसादीनां स्वत एवाऽशुचित्वम्'**इति वैशेषिकशास्त्रे प्रशस्तपादभाष्यम्।

**दुष्टस्य हविषोऽप्स्वहरणम्।।**

का.श्रौ. २५।१५५

**अर्थः-**

होमद्रव्यं दुष्टञ्चेज्जले प्रक्षेपणीयम्, न तद्धातव्यमित्यर्थः।

**उक्तो वा भस्मनि।।**-का.श्रौ. २५।११६

वा (अथवा) दुष्टं हविर्भस्मनि प्रक्षेप्तव्यम्, न तस्य होमः कार्य इत्यर्थः।

**शिष्टभक्षप्रतिषिद्धं दुष्टम्।।** का.श्रौ. २५।११७

शिष्टैर्मांसाद्यभक्ष्यं वस्तु दुष्टमुच्यते। मांसभक्षणे प्रायश्चित्तमप्यस्ति, यथा-

**जग्ध्वा मांसमभक्ष्यं च, सप्तरात्रान्यवान्पिबेत्।।**

-मनु. ११।१५२

अभक्ष्यमांसं भक्षयित्वा सप्तरात्रान् **यवान्** पिबेदित्यर्थः। अथ चतुर्विधानां द्रव्याणां विषये प्रमाणानि-

१- **'घृतं तीव्रं जुहोतन'** (यजु. ३।२) अग्नौ सर्वदोषनिवारकं घृतं होतव्यमित्यर्थः।

www.thearyasamaj.org

२- **'घृतेन वर्द्धयामसि'** (यजु. ३।३)। यज्ञसिद्ध्यर्थं घृतेनाग्निं प्रदीप्तं कुरुतेति।

यज्ञस्य फलम्- **'निकामे निकामे नः पर्जन्यो वर्षतु'** इति (यजु. २२।२२)

३- **'अस्मिन् हव्या जुहोतन'** (यजु. ३।१) (आ) समन्तात् (अस्मिन्) अग्नौ (हव्या) दातुमत्तुमादातुमर्हाणि वस्तूनि (जुहोतन) प्रक्षिपत।

दुग्धघृताद्यर्थमेव पशवो यज्ञेष्वानीयन्ते स्म, न च वधार्थमिति, यथोक्तम्-

**'आदिकाले खलु यज्ञेषु समालभनीया बभूवुर्नारम्भाय प्रक्रियन्ते स्म। अतश्च प्रत्यवरकालं पृषध्रेण दीर्घसत्रेण यज्ञमानेन पशूनामलाभाद् गवामालम्भः प्रावर्तितः। तं दृष्ट्वा प्रव्यथिता भूतगणास्तेषाञ्चापयोगादुपकृतानां गवां गौरवाद्योपहताग्नीनामुपहतमनसामतीसारः पूर्वमुत्पन्नः पृषध्रयज्ञे।'** -चरक विमा. १०।३

अत्र गोमांसभक्षणादेवातीसारोत्पत्तिरुक्ता। मांसन्तु पशुवधमन्तेरण नोपलभते, न च पशुवधः स्वर्ग्यः। यथा-

**'नाकृत्वा प्राणिनां हिंसां, मांसमुत्पद्यते क्वचित्।**
**न च प्राणिवधः स्वर्ग्यः, तस्मात् मांसं विवर्जयेत्।।'**
-मनु. ५।४८

**'अथो भैषज्ययज्ञा वा एते यच्चातुर्मास्यानि तस्मादृतुसन्धिषु प्रयुज्यन्ते। ऋतुसन्धिषुर्वै व्याधिर्जायते।'** (गो.ब्रा. १।१९) भैषज्ययज्ञा इत्यनेनाऽशुचिद्रव्याणां मांसादीनां खण्डनं स्पष्टमेव।

तथा **'वैश्वदेवी'** (का. ४।१३६) चातुर्मास्य-पर्वेषु वैश्वदेवी **पयस्या** भवति।

अन्यत्र **'न मांसमश्नीयात् यन्मांसमश्नीयात्, यन्मिथुनमुपेयादिति नत्वैवेषा दीक्षा।'** (शत. ६।२)।

अत्र यज्ञे मांसभक्षणस्य निषेध एवेति।

व्रतादौ दुग्धस्यैव सेवनम्। तद्यथा- **'क्षीरव्रतौ भवतः। सपत्नीको यजमानो व्रते दुग्धं पिबेत्, यवागू राजन्यस्यामिक्षा वैश्यस्य।'** (का.सू. ११३।११८) व्रते राजन्यः सपत्नीकः क्षत्रियो यवागूं पिबेत्। एवं सपत्नीको वैश्यः आमिक्षा श्रीखण्डं पिबेत्। मांसभक्षको न दीक्षितपदं प्राप्नोति, न व्रती भवति।

पशुवधपक्षपोषकेण सायणाचार्येणापि दुग्धपक्षं मत्वा गवां दोहने क्षीरपाके च मंत्रद्वयं विनियुक्तम्। यथा-

**'गां दोग्धुमध्वर्युर्युरयक्ष्मा वः प्रजयः'** इति मंत्रेण वत्सं बन्धनान्मुच्येत्, **'क्षीरं श्रपयितुं मातरिश्वनो धर्म'** इति मन्त्रेणोखां गार्हपत्ये स्थापयेत्। (कृ.य.तै.सं. १।६।९)

आभ्यां मन्त्राभ्यामत्र यज्ञे दुग्धस्यैवोपयोगो भवतीति सायणाचार्यस्याभिप्रायः पशुवधनिषेधे वर्तते।

एवम् **'अन्वारब्धेषु पयो जुहोति द्वे सृती'** इति (का. १९.८१) अत्र स्पष्टमेव यज्ञे दुग्धस्योपयोगो न तु मांसस्य। **'शेषं यजमानो भक्षयतीदं हविरिति'** (का. १९।८२)

तथैव याज्ञवल्क्यजनकसंवादेनापि सिद्ध्यति मखे पयदीनामेवोपयोगः।

तद्यथा-

'तदेतज्जनको वैदेहः याज्ञवल्क्यं पप्रच्छ वेत्थाग्निहोत्रं याज्ञवल्क्या इति। वेद सम्राडिति। किमिति। पय एवेति। यत् पयो न स्यात् केन जुहुया इति। ब्रीहियवाभ्यामिति। यद् ब्रीहियवौ न स्याताम्, केन जुहुया इति। या अन्या ओषधय इति। यदन्या ओषधयो न स्युः, केन जुहुया इति। वानस्पत्येनेति। यद्ध वानस्पत्यो न स्यात्, केन जुहुया इति। सहोवाच, नवा इह तर्हि किञ्चनासीदथ तद् हूयत वै सत्यं

www.thearyasamaj.org

श्रद्धायामिति, वेत्थाग्निहोत्रं याज्ञवल्क्य इति धेनुशतं ददामि' (श.कां. ११)

संवादेऽस्मिन् हिंसाजन्यं मांसं वपादिकञ्च न क्वापि लिखितमस्ति। तेनापि विज्ञायते न तदानीं यागेषु पशुवध प्रचार आसीत्। आयुर्वेदेऽपि वपामांसादिहोमविधिर्न, किन्तु गवादीनां दुग्धादुत्पन्नस्य घृतस्यैवेति। तद्यथा- '**नाऽशुचिरुत्तमाज्याक्षततिलकुशसर्षपैरग्निं जुहुयात्।**' (च.वि.अ. ८) अत्राप्याज्यस्यैव होमविधिर्न वपादेरिति।)

अजाया दुग्धं सर्वरोगहारकम्। कस्मात्? '**अजा ह सर्वा ओषधीरत्ति सर्वासामेवैनामेतदोषधीनां रसेनाच्छृणत्ति**' (श.पृ. ३४९)

'**मधुसर्पिषा त्रिस्त्रिर्जुहुयात्**'(च.वि.अ. ८)

'**ओषधीनां वा परमो रसो यन्मधु**'(श.११। ५)

एवञ्चतुर्विधानां द्रव्याणामेव सर्वत्र होमाविधिर्वेदादिसत्यशास्त्रेष्विति।

यथा- '**अपामार्गहोमः**' (कात्या. १६।२९)। '**अजाक्षीरमेके**' (का. १८।१) '**अजाक्षीरेणैके जुह्वाति शाखान्तरात्**' इति कर्काचार्य्यः। अत्राऽजायाः क्षीरमेव गृहीतं न तन्मांसमिति।

'**घृतेन ह वा एष देवाँस्तर्पयति**' (श.११।२५) घृतमेवात्र यज्ञ-साधनमस्ति। '**अग्नये रसवतेऽजक्षीर निर्वपेत्**'। (कृ.य.तै.सं. २।४)

वेदलिङ्गाद्यापि सिद्धे यज्ञे दुग्धघृतादीनामेवापयोगः। तद्यथा- '**ये देवा दिविषदो अन्तरिक्षसदश्च, ये चेमे भूम्यामधि। तेभ्यस्त्वं धुक्ष्व सवदा क्षीरं सर्पिरथो मधु।**' (अथर्व. १०।५।३)

वेदमन्त्रेऽस्मिन् सर्वदा-पदेन यज्ञादौ सर्वत्र दुग्धं घृतञ्चोपदिश्यते। तत्प्रचारार्थमेव पशुरक्षाविधायको मन्त्रः '**यजमानस्य पशून् पाहि।**'(यजु. १।१) महीधरभाष्यानुसारिणां तत् सन्तोषार्थं तत्कृत-भाष्यमेवात्रोद्ध्रियते- '**यजमानस्य पशून् अरण्ये सञ्चरतश्चोरव्याघ्रादिभयात् पाहि रक्षेति**' महीधरेणापि पशुवधो न स्वीकृतः। यथा- '**यजमानस्य पशूनित्यग्न्यगारस्यान्यतरस्य पुरस्ताच्छाखामुपगूहति।**' (का. ४।४०) '**पशूनान्तु क्रत्वङ्गभूतानां पालनमिहेष्यते**' इति कर्काचार्य्यः।

एवमेव '**ओषधे त्रायस्व स्वधिये मनं हिसीः।**' (य. ४।१) मन्त्रेणानेन यैर्याज्ञिकैः पशुवधः क्रियते, तैस्स्वभाष्यकारस्य महीधरस्यार्थो विलोकनीयः। यथा- ओषधे कुशतरुणं देवता। हे ओषधे! कुशतरुण! त्वं यजमानं त्रायस्व क्षुराद् रक्ष। स्वधिते क्षुरो देवता। हे स्वधिते क्षुर एनं यजमानं मा हिंसीः।' महीधरेणाप्यत्र रक्षापरत्वमेव भाष्यं कृतं तत्कथं नामाऽयं मन्त्रः साम्प्रतं याज्ञिकः पशुवधकर्मणि विनियुज्यते? कात्यायनेन लिखितमिति चेत् तत्कृतविनियोगार्थविरुद्धन्तदिति।

वेदेऽपि '**ये रात्रिम सुतिष्ठन्ति ये च भूतेषु जाग्रति। पशून् ये सर्वान् रक्षन्ति, ते न आत्मसु जाग्रति।**' (अ.१९, ४८, ५) इत्यादिषु मन्त्रेषु सर्वेषां पशूनां रक्षार्थमेवाज्ञास्ति। तेषां महोपकारं विस्मृत्याः अपराधमन्तरेण ये तान् घ्नन्ति यज्ञे ते कृतघ्नाः स्वार्थसाधकाः।

कात्यायनसूत्रादावपि पशूनां महिमैव गीयते। यथा- '**महाँस्त्वेव गौर्महिमेत्यध्वर्य्युः। अध्वर्युर्गां महयति।**' (शत. ३।३।२) '**ध्वरा हिंसा तदभावो यत्र**' (नि.पू.)

अध्वरमिति यज्ञनामसु पठितं निघण्टौ। यज्ञे यजमानस्य प्रतिनिधिरध्वर्य्युः। अध्वर्य्युर्गोदुग्धस्य महत्त्वन्तदुपकारं वा वर्णयति। '**महयतीति**' मह पूजायाम्, पूजा नाम सत्कारः। अध्वर्य्युर्गां महयति पूजयति सत्करोति, तद् गुणान् वा गायति।

अथ छागदुग्धगुणाः-

**दीपनं लघु संग्राहि, श्वासकासास्त्रपित्तनुत्।**
**अजानामल्पकायत्वात्, कटुतिक्तनिषेवणात्॥**
**नात्यम्बुपानाद् व्यायामात्, सर्वव्याधिहरं पयः॥**
-सु.सू.अ. ४५

www.thearyasamaj.org

अजा-दुग्धं दीपनं, लघु, संग्राहि, श्वास-कासास्र-पित्तनुत्। अजानाम् अल्पकायत्वात्, कटुतिक्तनिषेवणात्, नात्यम्बुपानात्, व्यायामद्, भ्रमणात् तासां पयः सर्वव्याधिहरम्भवति। अन्यत्राप्युक्तम्-

**अजोक्षा चन्दनं वीणा, आदर्शी मधुसर्पिषी ।**
**विषमौदुम्बरं शङ्खाः स्वर्णनाभोऽथ रोचना ।।**
**गृहे स्थापयितव्यानि, धन्यानि मनुरब्रवीत् ।**
**देव ब्राह्मणपूजार्थं, अतिथीनां च भारत ।।**

-महा. उद्यो.

यज्ञादिषु देवानां ब्राह्मणानामतिथीनां वा दुग्धद्वारा सत्कारार्थमजादयः पशवः पुराकल्प आसन्। तथैवेदानीमपि सत्कारार्थं रक्षणीयाः।

दुग्धप्रयोजनाऽभावे भैषज्ययज्ञेष्वजा महौषधी ग्राह्या। यथा-

**अजास्तनाभकन्दा तु, सक्षीरा क्षुपरूपिणी ।**
**अजा महौषधी ज्ञेया, शङ्खकुन्देन्दुपाण्डुरा ।।**

-सु.चि.अ. ३०

सायणाचार्यायापि यज्ञे पशुहिंसा न रोचते स्म, इति तल्लेखेन सुतरामनुमीयते।

यज्ञमंत्रार्थमबुध्वा स्वात्मविरुद्धमपि तेन लिखितमिति। यथा- **'क्रूरं पशुहिंसादि'** (कृ.य.तै.पृ. ६६९) **'क्रूरादिदोषाणां होमेन समाहितत्वात्'** (कृ.य.तै. ६।६।१) पशु हिंसा क्रूरं कर्मेति मत्वापि पुनः क्रूरादिदोषाणां होमेन समाहितत्वादिति यत्तदयुक्तम्। कुतः ? **'इषे त्वोर्ज्जे त्वेति'** यजुर्वेदीयप्रथममन्त्रे श्रेष्ठतमानां कर्मणामाज्ञा। तदिदं क्रूरं पशुहिंसनं निकृष्टतमं वेदबाह्य कर्म, तस्य होमेन शान्तिः कथमपि न्याय्यं न, हिंसकेन यावन्न तत्फलं भुज्येतेति।

शतपथेऽप्यहिंसेत्यस्य धर्मसाधनस्यैव यज्ञप्रकरणे प्रतिपादनमस्ति। तद्यथा- **'सं वो मनांसि संव्रता समुचितान्याकरम्। अग्ने पुरीष्याधिपा भव त्वं न इषमूर्ज्जं यजमानाय धेहीति शान्तिमेवाभ्यामेतद् वदति यजमानस्य प्रजायै पशूनामहिंसायै'** (य.१२।५८ तथा शत. १३।४।८) अत्र 'पशूनाम्हिंसायै' इति ब्राह्मणस्य तात्पर्यमहिसापरत्वमेवेति।

यैरुच्यते- अश्वमेधयज्ञेऽश्वस्य हननं क्रियते स्म, तदपि न सत्यमस्ति। यतस्तस्मिन्नेव शतपथे **'इदं मा हिंसीरेकशफ पशुमित्येकशफो वा एष पशुर्यदश्वस्तं मा हिंसीरिति'** (श.पृ. ६६८)

सत्यां हिंसायां यजमानस्य तपो विनष्टं भवति। तद्यथा-

**'तस्य तेनानुभावेन, मृगहिंसात्मनस्तदा ।**
**तपो महत् समुच्छिन्नं, तस्माद्धिंसां न यज्ञिया ।।**
**अहिंसा सकलो धर्मोऽहिंसा धर्मस्तथाविधः ।**
**सत्यन्तेऽहं प्रवक्ष्यामि, यो धर्मः सत्यवादिनाम्।।'**

(महा.शा.अ.२७२)

यज्ञप्रकरणेऽत्र छागपदेन छागदुग्धस्यैव ग्रहणम्। कथम् ? छाग्या इदं छागं पयः। **'तस्येदमित्यण्'** (पा. ४।३।१२)। छागदुग्धविषये प्रमाणम्।

यथा-

**छागं कषायमधुरं, शीतं ग्राहि पयो लघु ।**
**रक्तपित्तार्तिसारघ्नं, क्षयकासज्वरापहम् ।।**

(च.सं.अ. २४)

वपामेदादिशब्दानां मन्त्रोक्तानामयमथः- धारोष्णदुग्धे स्निग्धभागस्यैव वपासञ्ज्ञा। न तु पशुं हत्वा तस्य नाभिस्थानीयस्य वपाया अत्र ग्रहणम्। तस्या हिंसाजन्यत्वात्, वेदविरुद्धत्वाच्चेति।

एवं वपा-शब्दार्थो ज्ञेयः। **'रन्ध्रं श्वभ्रं वपो शुचिः'** इति त्रिकाण्डी। दुग्धस्थानमधस्तत्र स्थितं पयो वपा। गवादीनामूधसि स्थितं धारोष्णं दुग्धमेव वपासञ्ज्ञकमित्यर्थः। यतो वपाशब्दः शुभ्रार्थः वतते,

www.thearyasamaj.org

ततो न यज्ञे सवनीयपशोर्वपा ग्राह्या, हिंसाजन्यत्वात्, रोगोत्पादकत्वात्, वेदविरुद्धत्वाच्चेति। दुग्धस्यैव अवस्थान्तररूपा वपा। **'प्रेष्यब्रुवोहविषो देवता सम्प्रदाने'**। (पा. २।३।६१) अत्रोदाहरणम् **'अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रू३ हि'** इत्यादावपि **'छागस्य'** इत्यनेन छाग्या दुग्धस्यैव ग्रहणम्। दुग्धस्य धारोष्णस्यैव **'वपा'** संज्ञा, उक्तं मनुना-

**समुत्पत्तिं च मांसस्य, वधबन्धौ च देहिनाम् ।**
**प्रसमीक्ष्य निवर्तेत, सर्वमांसस्य भक्षणात् ।।**

(मनु. ५।४९)

**'सर्वमांसस्य भक्षणात्'** इत्यनेन न कस्यापि जीवस्य मांसं भक्षणीयमिति स्पष्टमेव।

**निवृत्तामिषमद्यो यो, हिताशी प्रयतः शुचिः ।**
**निजागन्तुकरुन्मादैः सत्ववान् न स युज्यते ।।**

(च.चि.अ. १४)

अभक्ष्याणां मांसवपादीनां भक्षणेनोन्मादादयो रोगा उत्पद्यन्ते, तथैवाग्नौ मांसवपादिप्रक्षेपणेन तज्जन्यधूम्रादिना जलवायवादयो दुष्यन्ति, ततो न यज्ञे तेषामुपादानमिति।

मांस-भक्षणस्य तद्धोमस्य च सर्वकाल-निषेधविधायकावन्यावपि मन्त्रौ।

यथा-

**य आमं मांसमदन्ति पौरुषेयञ्च ये क्रविः ।**
**गर्भान् खादन्ति केशवास्तानितो नाशयामसि ।।**

(अथर्व.)

(ये) (केशवाः) कामिनः, केशाः सन्ति येषान्ते **'केशाद्वोऽन्यतरस्याम्'** (अष्टा.) (आमम्) अपरिपक्वं (मांसम्) खादन्ति (च) (पौरुषेयम्) पुरुषसम्पादितं परिपक्वमांसं (गर्भान्) अण्डानि (खादन्ति) भक्षयन्ति (तान्) तान् सर्वान् (इतः) वर्तमानशरीरात् (नाशयामसि)। सार्वकालिकोऽत्र मांस-भक्षण-निषेधः।

**तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणा। लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः।।** (यजुर्वेदः १९।८१)

**भावार्थः-**

'ये दीर्घसमयावधि जटिला ब्रह्मचारिणो वा पूर्णविद्याजितेन्द्रिया भद्राः जनाः सन्ति, त एव यजधातोरर्थं ज्ञातुमर्हन्ति, न बाला अविद्वांसो वा। स होमाख्यो यज्ञो यत्र मांसक्षाराम्लतिक्तगुणादिरहितं किन्तु सुगन्धिपुष्टमिष्टं रोगनाशकादिगुणसहितं हविः स्यात्, तदेव होतव्यं च स्यादिति' -आचार्यदयानन्दः।

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।**
**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।।**

(मनु.)

अथ शतपथकारः स्वयमेव मांसशब्दार्थमाह- **'एतद् ह वै परममन्नाद्यं यन्मांसं स परमस्यैवान्नाद्यस्यात्ता भवति।'** (शत. ११।७)

**अयमभिप्रायः-**

यज्ञप्रकरणे मांस-शब्देन परमान्नस्य पायसस्यैव ग्रहणम्। न च शतपथकारेण मांसपदेन पशुवधमांसं गृहीतम्। अतो यत्र कुत्रादि तत्र पशुवधलेखोऽस्ति, न स शतपथकारस्य, प्रक्षिप्तत्वात् तस्येति। **'स परमस्यैवान्नाद्यस्यात्ता भवति'** इति कथनादपि पशुवधमांसनिषे। स यजमानः परममन्नं पायसादिकमेवाऽत्तु नाऽभक्ष्यं दुष्टं मांसादिकम्।

**शतपथे मांसखण्डनम्**

**'पचन्ति वा अन्येषु अग्निषु वृथा मांसमथैतेषां नातोऽन्या मांसाशा विद्यते यस्याचैते भवन्ति'** (शत. ११।७)

**अस्यार्थः-**

www.thearyasamaj.org

(वा) अन्येषु (गार्हपत्यादिभिन्नेष्वग्निषु) (मांसम्) (वृथा निष्फलम्) (पचन्ति) अथ (अनन्तरम्) एतेषाम् (गार्हपत्याद्यग्नित्रयाणाम्) अत: (पायसादे:) अन्या (भिन्ना) मांसाशा (पशुवधमांसभक्षणम्) (न) विद्यते (नास्ति) (यस्य) यस्याग्निहोत्रिण: (उ) इति वितर्के (एते) अग्नय: (भवन्ति)।

अर्थात्, पशोर्वपा-मांसादिकमग्नौ गार्हपत्याद्यग्नित्रयसेविभिराहिताग्निभिर्न कदापि होतव्यं न केनापि भक्षणीयं वा, यत: प्राणिवधप्राप्तं हिंसात्मकं वपादिकं यज्ञे न क्वापि वेदानुकूलमिति।

**'यदिमा आप एतानि मांसानि।'** (शत. ७।४।२)। अत्र जलं मांसमुच्यते।

**'त्वक् तोक्मानि मांसम्।'**(शत. अ. ८।३)।

कात्यायनश्रौतसूत्रे सौत्रामणिनिरूपणे अष्टादशसूत्रस्योपरि कर्काचार्यभाष्यम्- **'तोक्मशब्देन यवा विरूढ़ा उच्यन्ते'**। अत्र हरितानां यवानां मांससंज्ञास्ति।

**आम्रस्यानुफले भवन्ति,**
**युगपन्माँसास्थिमज्ञादयो।**
**लक्ष्यन्ते न पृथक् त्वणुतया,**
**पुष्टास्त एव स्फुटा:।।**

-बृहन्निघ.

आम्रस्य अनुफले युगपन्मांसास्थिमज्ञादयो भवन्ति तु पृथक् अणुतया न लक्ष्यन्ते, पुष्टा: त एव स्फुटीभवन्ति। एवम् तिलचूर्णस्यापि मांस-संज्ञा। श्राद्धादौ फलैरहरह: श्राद्धं कुर्यान्न तु मांसेनाऽभक्ष्येणेति। जीवतामेव पितृणां तत्। कुत्रापि मांस-शब्देन **'जटामांसी'** गृह्यते। एवम् **'मांस-रोहिणी'** इत्यादि मांस-पदेन गृह्यते। ●

# वेदानां वैशिष्ट्यम्

-श्री शिवपूजनशास्त्री
नई दिल्ली, बड़ौत (मेरठ)

(१)

अस्तीश्वरीया कृतिरेष वेद:,
न यत्र कश्चिद् विपरीत-लेख:।
स्वत: प्रमाणं ह्यत एव वेदान्,
ब्रुवन्ति देवा ऋषयो महर्षय:।।

(२)

ग्रन्थोऽस्ति नो कश्चिदियत्पुराण:,
समस्त-विश्वस्य च पुस्तकालये।
नेदं मतं केवलमस्मदीयम्,
वैदेशिकानामपि बुद्धिरेषा।।

(३)

अस्यैव वेदस्य च सरभूत:,
मन्त्रोऽस्ति यं गुरुमन्त्रं वदन्ति।
एतत्सम: क्वापि न कोऽपि मन्त्र:,
इष्टं जन: यस्य जपैरुपैति।।

(४)

जागर्ति जीवत्यधुनार्यजाति:,
ज्ञानस्य राशीनुपलभ्य वेदान्।
आसीत् कदाचिद् गुरुरेष देश:
वैदिकविचाराश्रयणेन नूनम्।।

(५)

वेदानुकूला वयं स्याम यावत्,
देशो न नंक्ष्यति भवेन्नो न नाश:।
अतोऽध्यापनं चाध्ययनं श्रुतीनाम्,
क्रियतामिदानीमनिर्वायतो हि।। ५।।

www.thearyasamaj.org

# ❋ वेदमर्मज्ञाः भारतीयाः पाश्चात्याश्च विपश्चितः ❋

-डॉ. कपिलदेवद्विवेदी, पूर्वकुलपतिः
गुरुकुलमहाविद्यालयः ज्वालापुरम् (हरिद्वारम्)

## (क) वेदज्ञाः भारतीयाः विद्वांसः

वेदाः विज्ञाननिधयः सर्वज्ञानमयाश्च। चतुर्वर्ग-प्राप्तेः, तन्मार्गदर्शनस्य चाधारभूता इमे। वेदानां महत्त्वं न केवल भारतीयैरपि तु पाश्चात्त्यैरपि विद्वद्भिः सर्वतोभावेन उररीकृतम्। वैदिक-वाङ्मयस्य समुद्धारे राजा-राममोहनराय-संस्थापितेन **ब्राह्मसमाजेन**, महर्षि-दयानन्द-स्थापितेन **आर्य-समाजेन** च बहु प्रयतितम्। ब्राह्मसमाजेन भारतीय-संस्कृति-संपोषणार्थम् उपनिषत्सु, आर्यसमाजेन च वेदेषु विशेषतो ध्यान दत्तम्। यद्यपि वेद-विदुषां महती परम्परा। तदिह समास-सरणिम् अनुसृत्य दिङ्मात्रमेव प्रस्तूयते।

### (१) ऋग्वेद-संहिता

**(क) ऋग्वेद-संहिता-(१) आचार्य-सायणः** समग्रस्य ऋग्वेदस्य परम्परागतां सरणिम् अनुसृत्य भाष्यं व्यदधात्। सायण एव वेदार्थावबोधाय पाश्चात्त्यविदुषाम् आधाररूपोऽभवत्। सायणेन ५ वैदिक-सहिताः; ११ ब्राह्मणग्रन्थाः, २ आरण्यकग्रन्थाश्च स्वीयेन पाण्डित्यपूर्णेन भाष्येण सभाजिताः। **(२) वेङ्कटमाधवः** - वेङ्कटमाधव-कृतम् ऋग्वेद-भाष्यं डॉ. लक्ष्मणसरूपेण सपाद्यचतुर्षु भागेषु प्रकाशितम्। वेङ्कटमाधवो व्याससरणिं विहाय समास-सरणिम् अनुसरति। **(३) स्वामी दयानन्दः** - नैरुक्तप्रक्रियाम् अवलम्ब्य आध्यात्मिक-आधिदैविक-व्याख्या-पुरःसरम् ऋग्वेद-भाष्यं (मंडल ७, सूक्त ८० पर्यन्तम्) संस्कृतार्य-भाषा-समन्वितं प्राकाशयत्। नात्र केवला यज्ञिया कर्मकाण्डपद्धतिराश्रिता। अकालमृत्यु-योगात् कार्यमिदम् अपूर्णमेवावशिष्टम्। **(४) पं० आर्यमुनिः**- अवशिष्टं भागम् अनूदितवान्। **(५) आचार्यो विश्वबन्धुः** भाष्य-चतुष्टय-समन्वितं ऋग्वेदम् अष्टसु भागेषु प्राकशयत्। **(६) श्रीपाद दामोदर सातवलेकरः** -ऋग्वेद-संहितायाः समीचीन संस्करणं भूमिका-परिशिष्टादि-समन्वितं प्राकाशयत्।

कतिपयैः विद्वद्भिः भारतीय-भाषास्वपि ऋग्वेद-संहितानुवादः प्रकाशितः। **(१) रमेशचन्द्रदत्तः** बंगभाषायाम्, **(२) रामगोविन्दः त्रिवेदी** हिन्दी-भाषायाम्, **(३) कोल्हट-पटवर्धनौ** मराठी-भाषायाम्, अष्टसु भागेषु प्राकाशयताम्। **(४) श्री सातवलेकरः** भागचतुष्टये- **'ऋग्वेद का सुबोध भाष्य'** नाम्ना हिन्दीभाषानुवादं प्राकाशयत्। अयमेव देवानुसारं **'देवतसंहिता'** भागत्रयेण प्राकाशयत्। अत्र देवतानुसार मन्त्राणां संकलनम् ऋग्वेदमनुरुध्य वर्तते। **(५) सिद्धेश्वरशास्त्री चित्रावः**- मराठी-भाषायाम्, **(६) जयदेवविद्यालंकारः**- हिन्दीभाषायाम् अनुवादं व्यदधात्। **(७) स्वामी डॉ. सत्यप्रकाशः सरस्वती**-आंग्लभाषायाम् अनुवादम् अकरोत्।

**(ख) ऋग्वेद-विषयकाः ग्रन्थाः - (१) सायणः** ऐतरेयब्राह्मणस्य ऐतरेयारण्यकस्य च भाष्यम् अकरोत्। ऋग्वेद-भाष्य-भूमिका-ग्रन्थं चालिखत्। **(२) सत्यव्रतः सामश्रमी**- एतरेयब्राह्मणम् ऐतरेयारण्यकं च सायणभाष्ययुक्तं समपादयत्, ऐतरेयालोचनं ग्रन्थं

www.thearyasamaj.org

च प्रणिनाय। (३) **डा० मंगलदेवः शास्त्री**- ऋग्वेद-प्रातिशाख्यं समपादयत्, आंग्लभाषायां भूमिकां चालिखत्। (४) **गोबिन्दः अनृतश्च**- शांखायन-श्रौतसूत्रस्य टीकाम् अलिखताम्। (५) **राजेन्द्रलाल मित्रः**-आश्वलायन-श्रौतसूत्रस्य सम्पादनञ्चकार। (६) **अविनाशचन्द्रदासः**- **'ऋग्वेदिक इण्डिया'** ग्रन्थम् आंग्लभाषायाम् अलिखत्। (७) **महेशचन्द्र राय तत्त्वनिधिः**- **'ऋग्वेदेरसमालोचना'** ग्रन्थं बंगभाषायाम् अलिखत्। (८) **नरदेव शास्त्री वेदतीर्थः**- ऋग्वेदसमीक्षारूपेण **'ऋग्वेदालोचन'**-ग्रन्थं प्रणिनाय। (९) **कपालिशास्त्री** ऋग्वेदं **'सिद्धाञ्जन'** भाष्य-युक्तं भागद्वये प्रकाशयत्। (१०) **स्वामी दयानन्दः** **'ऋग्वेदादिभाष्यभूमिका'** ग्रन्थं संस्कृत-हिन्दी-भाषायुतं प्रणिनाय। ऋग्वेद-विषय-विवेचनात्मकोऽयं ग्रन्थो महत्त्वं भजते। (११) **स्वामी विश्वेश्वरानन्दः** चतुर्वेद-पद सूची-ग्रन्थान् लवपुरतः प्राकाशयत्। (१२) **ला-महोदयः (N.N. Law)**-Age of the Rigveda ग्रन्थम् अरचयत् (१३) **श्रीरामशर्मा**- ऋग्वेदस्य हिन्दी-भाषानुवादं व्यरचयत्।

### (२) यजुर्वेदः (शुक्लः कृष्णश्च)

(क) यजुर्वेद-संहिता (१) **उव्वटो महीधरश्च** शुक्लयजुर्वेदस्य भाष्यं चक्रतुः। प्रसिद्धमिदं भाष्यम्। (२) **सायणः** काण्वसंहितायाः (२० अध्यायं यावत्), तैत्तिरीय-संहितायाश्च भाष्यं चक्रे। (३) **दुर्गादास लाहिड़ी**- शुक्लयजुर्वेदं (महीधर-भाष्य-युक्तम्) कृष्णयजुर्वेदीयां तैत्तिरीय-संहिताञ्च प्राकाशयत्। (४) **सातवलेकरः** - शुक्लयजुर्वेदीयां वाजसनेयी-संहितां काण्वसंहितां च, कृष्णयजुर्वेदीयां तैत्तिरीयसंहितां, मैत्रायणीसंहितां काठकसंहितां च महता श्रमेण प्राकाशयत्। यजुर्वेदस्य पञ्चाध्यायानां (अध्याय १, ३१, ३२, ३६, ४०) **'सुबोधभाष्यम्'** व्यलिखत्। (५) **स्वामी दयानन्दः**- नैरुक्तप्रक्रियाम् आश्रित्य समग्रस्य यजुर्वेदस्य संस्कृतार्यभाषायुक्तं भाष्यं चकार। प्रामाणिकं चैतद् भाष्यम्। (६) **जयदेव विद्यालंकारः**- यजुर्वेदस्य हिन्दी-भाषायां भाष्यं लिलेख। (७) **श्रीरामशर्मा**-शुक्लयजुर्वेदस्य हिन्दी-भाषानुवादं व्यदधात्। (८) **श्रीधरपाठकः**-शुक्लयजुर्वेदस्य मराठी-भाषायाम् अनुवादं चक्रे। (९) **सत्यव्रतः सामश्रमी**-शुक्लयजुर्वेदस्य बंग-भाषायाम् अनुवादं विदधौ। (१०) **ज्वालाप्रसादमिश्रः**- शुक्लयजुर्वेदस्य हिन्दी-भाषानुवादञ्चकार।

**(ख) यजुर्वेद-संबद्धा अन्ये ग्रन्थाः**:- (१) **आचार्य सायणः**- तैत्तिरीयब्राह्मणस्य तैत्तिरीयारण्यकस्य प्रशंसनीयं भाष्यं चकार (२) **भट्टभास्करः**- तैत्तिरीयब्राह्मणस्य भाष्यम् अकरोत्। (३) **सत्यव्रतः सामश्रमी**- शतपथब्राह्मणं सायण-भाष्य-सहित प्राकाशयत्। (४) **गङ्गाप्रसादः उपाध्यायः** समग्रस्य शतपथब्राह्मणस्य हिन्दीभाषायां भाष्यं चकार। तत्पुत्रः **स्वामी डॉ. सत्यप्रकाशः** आंग्लभाषा-भूमिका-युक्तं कृत्वा तत् प्राकाशयत्। (५) **उव्वटः**- कात्यायनकृते शुक्लयजुःप्रातिशाख्ये भाष्यम् अलिखत्। (६) **कर्कः, जयरामः हरः**, विश्वनाथः- एभिः स्वतन्त्र-रूपेण पारस्करगृह्यसूत्रे भाष्याणि लिखितानि।

### (३) सामवेदः

**(क) सामवेदसंहिता**- (१) **सायणः**- समग्रस्य सामवेदस्य भाष्यं कृतवान्। (२) **सातवलेकरः**- सामवेदसंहितायाः परिष्कृतं संस्करणं भूमिकादियुतं प्राकाशयत्। अयं सामवेदस्य अर्थ-भावार्थ-युतं संस्करणमपि प्राकाशयत्। (३) **दुर्गादासः लाहिड़ीः**- सामवेदस्य सायण-भाष्यसहितं संस्करणं

www.thearyasamaj.org

प्राकाशयत्। (४) **सामवेद- भाष्यरूपेण एते ग्रन्थाः प्राप्यन्ते-**

(क) **सत्यव्रतः सामश्रमी**- बङ्ग-भाषानुवादः, (ख) **तुलसीरामः स्वामी**- स्वामीदयानन्दपद्धतिम् अनुसृत्य हिन्दी-भाष्यम्, (ग) **जयदेव विद्यालङ्कारः**- हिन्दी-भाष्यम्, (घ) **श्रीरामशर्मा**- हिन्दी-भाष्यम्, (ङ) **वीरेन्द्र शास्त्री**-हिन्दी-भाषानुवादः।

**(ख) सामवेद-संबद्धा अन्ये ग्रन्थाः**- (१) **सायणः**- सामवेदीयानाम् एतेषां ब्राह्मणानां भाष्यम् अकरोत्- ताण्ड्य ब्रा. (पंचविंशब्रा.) षड्विंशब्रा., सामविधान ब्रा., आर्षेय ब्रा., देवताध्याय ब्रा., उपनिषद् ब्रा. संहितोपनिषद् ब्रा०, वंशब्राह्मणं च। (२) **सत्यव्रतः सामश्रमी**- एतेषां ग्रन्थानां संपादनं बङ्गभाषानुवादं च व्यदधात्-वंशब्राह्मणम्, देवताध्याय-ब्राह्मणम्, मन्त्रब्राह्मणम् गोभिलगृह्यसूत्रं च। (३) एभिः विद्वद्भिः एते ग्रन्थाः प्रकाशिताः-

(क) **पुष्पर्णि लक्ष्मण शास्त्री द्रविडः**- साम-प्रातिशाख्यम् (पुष्पसूत्रम्), (ख) **आनन्दचन्द्रः**- अग्निस्वामि-भाष्य-सहितं लाट्यायन-श्रौतसूत्रम् (१८७०-७२ ई.), (ग) **चन्द्रकान्त तर्कालङ्कारः** गोभिलगृह्यसूत्रम् (१८७१-८०)।

**(४) अथर्ववेदः** -

(क) **अथर्ववेद-संहिता** (१) **दुर्गादास लाहिड़ी**- सायण-भाष्यसहिता अथर्ववेद-संहिता ५ भागेषु प्रकाशिता। (२) **शङ्करपाण्डुरङ्गपंडितः** सायणभाष्य-संहितं संस्करणं प्राकाशयत्। (३) **सातवलेकरः**- अथर्ववेदसंहिताम् (शौनकीयाम्) १९४३ ईसवीये प्राकशयत्। अयम् **'अथर्ववेद का सुबोध भाष्य'** ग्रन्थं पञ्च भागेषु प्रकाशितवान्। अत्र मन्त्रार्थेन सहैव विशदा हिन्दी-व्याख्या वर्तते। अथर्ववेदे सर्वोत्तमोऽयं व्याख्याग्रन्थः। एष च श्री सातवलेकरस्य अगाधवैदुष्यं कठिन-परिश्रमं च बोधयति। (४) **क्षेमकरण त्रिवेदी**- समग्रस्य अथर्ववेदस्य संस्कृत हिन्दी-भाष्यं व्यदधात्। (५) **जयदेव विद्यालंकारः**- समग्रस्य अथर्ववेदस्य हिन्दी-भाष्यम् अकरोत्। (६) **श्रीराम शर्मा**- हिन्दी-भाष्यं चकार। (७) **विश्वबन्धुः शास्त्री**-सायण-भाष्य-संहिताम् अथर्ववेद-सहिताम् ५ भागेषु प्राकाशयत्। (८) **डॉ. रघुवीरः**- अथर्ववेदस्य पैप्पलाद-संहिता प्राकाशयत्।

**(ख) अथर्ववेद-संबद्धा अन्ये ग्रन्थाः**- एभिः विद्वद्भिः अथर्ववेद-संबद्धा इमे ग्रन्थाः प्रकाशिताः- (१) **विश्वबन्धुः**- अथर्ववेदप्रातिशाख्यम्, अथर्ववेदीय-बृहत्सर्वानुक्रमणी च, (२) **भगवद्दत्तः**- अथर्ववेदीय पञ्चपटलिकां, माण्डूकीशिक्षां च, (३) **क्षेमकरणः त्रिवेदी**- गोपथब्राह्मणं हिन्दीभाषानुवाद-संहितम्, (४) **राजेन्द्रलाल मित्रः** -गोपथब्राह्मणम्।

**(५) विविधा ग्रन्थाः**

वैदिकवाङ्मय-सबद्ध एते गन्थाः विद्वद्भिः प्रकाशिताः प्रणीताश्च।

(१) **चतुर्वेद-सहिताः** (मूलमात्रम्)-वैदिक यन्त्रालयः, अजमेरस्थः। (२) **डॉ. लक्ष्मणस्वरूपः** यास्ककृतनिरुक्तं समपादयत्, आंग्लभाषानुवादं च चक्रे। (३) **चन्द्रमणिः विद्यालंकारः**- यास्ककृत-निरुक्तस्य हिन्दीभाष्यम्, (४) **सत्यव्रत सामश्रमी**- निरुक्तम् (४ भागेषु), निरुक्तालोचनम्, त्रयी-चतुष्टयम् (५) **डा० चिन्तामणि विनायक वैद्यः**-History of Sanskrit Literature (Vedic Period) (६) **भगवद्दत्तः** - वैदिक वाङ्मय का इतिहास (३ भागेषु), वेद-विद्या-निदर्शन, (७) **डॉ. मंगलदेवशास्त्री**- ऋक्प्रातिशाख्यम् (सम्पादितम्), भारतीय संस्कृति

www.thearyasamaj.org

का विकास, (८) डा० **सूर्यकान्तः**- अथर्व-प्रातिशाख्यम् (संपादितम्), वैदिक कोश, वैदिक व्याकरणशास्त्र, वैदिक धर्म एवं दर्शन, A Practical Vedic Dictionary, (९) **विश्वबन्धुः**- वैदिक-पदानुक्रम-कोशः (१६ भागेषु), वेदसार, (१०) **लोकमान्य-तिलकः**-Arctic Home in the Vedas, orien, Vedic chronology and Vedanga Jyotish (११) **हंसराजः**- वैदिककोशः (प्रथमो भागः), **वासुदेवशरण अग्रवालः**- वेदविद्या, वेदरश्मि, उरु ज्योति, पृथ्वीपुत्र, Vision in long Darkness, Thousand Syllabled Speech, Vedic lectures. (१४) **रामगोविन्दः त्रिवेदी**- वैदिक साहित्य, गङ्गा (वेदाङ्कः सपादितः), (१५) **बलदेवोपाध्यायः**- वैदिक साहित्य और संस्कृति, सायण और माधव, वेदभाष्य-भूमिका-संग्रह (संपादितः) (१६) **सातबलेकरः**- वैदिक व्याख्यान माला (४८ व्याख्यान ग्रन्थाः, ४ भागेषु), हिन्दी, मराठी, गुजराती, भाषासु), वेदामृत, अथर्ववेद-सुबोध-भाष्य (५ भागेषु, हिन्दी-मराठी-गुजराती- भाषासु), उपनिषद्-ग्रन्थमाला (९ उपनिषदां हिन्दी-भाष्यम्), (१७) **मजूमदारः**- Vedic Age, (१८) **स्वामीहरिप्रसादः वैदिकमुनिः**-स्वाध्यायसंहिता (१९) **शिवशंकर काव्यतीर्थः** -वेदार्थनिर्णय, वैदिक-विज्ञान, (२०) **पं० भीमसेन शर्मा**- संस्कार-चन्द्रिका, (२१) **स्वामी दर्शनानन्दः**-उपनिषद्भाष्य, वैदिक-विषयकाः लघुग्रन्थाः, (२२) **गुरुदत्तः विद्यार्थी** The Terminology of the Vedas, (२३) **प्रियरत्न आर्षः**-यम-पितृ-परिचय, वैदिक मनोविज्ञान, अथर्ववेदीय चिकित्साशास्त्र, (२४) **योगी अरविन्दघोषः** On the Vedas, Secret of The Vedas, (२५) **डॉ. पी.एल. भार्गवः** India in the Vedic Age, (२६) **डॉ. रामगोपालः** India of Vedic Kalpasutras, वैदिक व्याकरण, (२७) **डॉ. कपिलदेवद्विवेदी**- अथर्ववेद का सांस्कृतिक अध्ययन, वेदामृतम्-ग्रन्थमाला (४० भागेषु), वैदिक मनोविज्ञान, वेदों में नारी, चतुर्वेदसुभाषितावली (४ भागेषु), (२८) **डॉ. मुन्शीराम शर्मा**- वैदिक साहित्य और संस्कृति, (२९) **वाचस्पतिगैरोला**- वैदिक साहित्य और संस्कृति, (३०) **रामकुमाररायः**- वैदिक माइथोलोजी, वैदिक इन्डेक्स, ओरिजिनल संस्कृत टेक्स्ट्स-ग्रन्थानां हिन्दी-भाषायामनुवादः, (३१) **डॉ. हरिशङ्कर जोशी**-वैदिक विश्व-दर्शन, (३२) **भारती कृष्णतीर्थः (जगद्गुरुः शंकराचार्यः)**-Vedic Mathematics, (३३) **पं. गिरिधर शर्मा चतुर्वेदः**-वैदिक विज्ञान और भारतीय संस्कृति, (३४) **डॉ. दांडेकरः**- Veidic Bibliography, (३५) **डॉ. स्वामी सत्यप्रकाशः**- Founders of Sciences in Ancient India, Eng. Tr. Of the Rigveda and Yajurveda, Tr. Of some Upanisada, Agnihotra, वेदों पर अश्लीलता का व्यर्थ आक्षेप, (३६) **पं. जयदेव शर्मा**- क्या वेद में इतिहास है ?, (३७) **पं. रघुनन्दन शर्मा**- वैदिक सम्पत्ति, (३८) **पं. वीरसेनः वेदश्रमी**- वैदिक सम्पदा, (३९) **डॉ. जयदत्त-उप्रेती**- वेदों में इन्द्र, (४०) **डॉ. करमबलेकरः**- Atharva Veda and the Ayurveda, (४१) **डॉ. भार्गवः**- Rigvedic Geography of India, (४२) **लॉ**- (N.N. Law) Age of the Rigveda, (४३) **मेहता**- Positive Sciences in the Vedas, (४४) **रेले (Rele)** Vedic Gods, as Figures of Biology.

**(ख) वेदज्ञाः पाश्चात्त्याः विद्वांसः**

www.thearyasamaj.org

भारतीय-विदुषामिव पाश्चात्त्यैरपि विद्वद्भिः वेदानां महत्त्वं स्वीकृतम्। वैदिक-वाङ्मये विविध-विद्याऽन्वेषणाय तत्त्वार्थज्ञानाय च तैरपि भूयान् श्रमो विहितः। वैदिक-वाङ्मयाराधने तैर्यावान् श्रमो व्यधायि, स नूनमेव प्रशंसनमर्हति। तैः वैदिकवाङ्मयस्य प्रायशः सर्वेष्वेव अङ्गेषु घोरः परिश्रमो व्यधायि। तेषां वाङ्मयसेवा विद्वत्-तल्लजानामपि प्रशस्तिमाप। इह दिङ्मात्रं तत् प्रस्तूयते।

**(१) ऋग्वेद-संहिता**

**(क) ऋग्वेद-संहिता- (१) फ्रीड्रिश-रोजेन-** (Friedrich Rosen)- अयं पाश्चात्त्यदेशेषु सर्वप्रथमम् ऋग्वेद-सम्पादनम् अकरोत्। स ऋग्वेदस्य प्रथमाष्टकस्य मूलपाठं, तस्य च लेटिन-भाषायाम् अनुवादं १८३८ ईसवीये प्रकाशितवान्। असामयिक-देहावसानात् तत् कार्यम् अवरुद्धम्। **(२) मोक्ष-मूलरः** (Max Mueller)- सर्वप्रथमं सायण-भाष्य-संहितम् ऋग्वेदं सम्पादयत्। १८४९ ई. प्रारब्ध तत् कार्यं १८७५ ईसवीये पूर्तिम् अगात्। २७ वर्षाणां भूरि श्रमेण इदं कार्यं पूर्तिमाप। ३ सहस्राधिकषु पृष्ठेषु ग्रन्थोऽयम्। ग्रन्थस्यास्य भूमिका शताधिकेषु पृष्ठेषु वर्तते। द्वितीयं संस्करणं १८९०-१८९२ ई० प्रकाशमाप। एतत् कार्यं मोक्षमूलरस्य कठोरम् अध्यवसायं संसूचयति। (३) थियोडोर आउफ्रेष्ट (Theodor Aufrecht)- समग्रम् ऋग्वेदं रोमनलिप्यां १८६१-६३ ई० प्राकाशयत्। द्वितीयं संस्करण १८७७ ई० प्रकाशमाप। अति प्रचलितम् एतत् संस्करणं पाश्चात्त्यदेशेषु।

**(ख) ऋग्वेदस्य अनुवादाः- (१) श्री विल्सनः-** ;H.H. Wilson) प्रथमोऽयम् ऋग्वेदस्याङ्ग्लभाषायाम् अनुवादकः। प्रकाशितोऽनेन ऋग्वेदानुवादः १८५० ईस्वीये। अनुवादोऽयं सायणभाष्यानुसारी। विल्सन् सायणस्य प्रबलः समर्थकोऽभूत्। **(२) ग्रासमानः-** (H. Grassmann) समग्रस्य ऋग्वेदस्य जर्मनभाषायां पद्यानुवादम् अकरोत्। अनुवादोऽयं १८७६-७७ ई. प्रकाशितोऽभूत्। रोठ-महोदयस्य शिष्योऽयं ग्रासमानः। भाषा-वैज्ञानिकीं पद्धतिमाश्रित्य अनुवादम् अकरोत्। सायण-विरोधिष्वस्य गणना। **(३) लुडविग** (A. Ludwig) - अयं मध्यममार्गम् अवलम्ब्य षड्भार्गेषु ऋग्वेदस्य-जर्मन-भाषायाम् अनुवादम् अकरोत्। १८७६-१८८८ ई० ग्रन्थः प्रकाशमाप। **(४) ग्रिफिथ** (R.T.H. Griffith)- अयं चतुर्णामपि वेदानाम् आङ्ग्लभाषायां पद्यानुवादकः। सायण-भाष्यं प्रायशः अनुसृत्य ऋग्वेदस्य पद्यानुवादं १८८९-१८९३ यावत् प्राकाशयत्। आवश्यक-टिप्पणी-सहितोऽयं पद्यानुवादः। **(५) प्रो० ओल्डेनबर्ग** (H. Oldenberg) समग्रस्य ऋग्वेदस्य जर्मन-भाषायामनुवादम् अकरोत्। १९०९-१९१२ ईसवीये प्रकाशितोऽभूद् ग्रन्थः। अत्र वैदिक-समालोचनायाः पराकाष्ठा प्राप्यते। ऋग्वेदानुवादेषु सर्वोत्कृष्टोऽयं मन्यते। वैदिक-समालोचनायाम् ओल्डेर्गस्य तदेव स्थानम्, यद् वेदान्ते शंकराचार्यस्य। **(६) लांग्ल्वा** (Langlois)- अयं स्थानम्, ऋग्वेदस्य चतुर्भागेषु फ्रेंच-भाषायाम् अनुवादम् (१८४८-१८५१ ई.) अकरोत्। महत्त्वपूर्णोऽयम् अनुवादः।

कतिपयैः पाश्चात्त्यैः विद्वद्भिः ऋग्वेदस्य विशिष्टम् अंशमेवावलम्ब्य अनुवादादिकं कृतम्। तेषु विशेषम् उल्लेखम् अर्हन्ति। **(१) रुडोल्फ रोठः** (Rudolph Roth), **गेल्डनर** (Karl Geldner) **केगी** (Adolf Kaegi) च, एतौ ७० सूक्तानाम् अनुवादं

www.thearyasamaj.org

कृतवन्तौ, (३) रोअर (Roer), (४) **हिलेब्राण्ड** (A. Hillebrandt).

(ग) **ऋग्वेदीयं संकलनम्**- कश्चित् छात्रोपयोगि संकलनमेव ऋग्वेदसूक्तानां विहितम्। तेषु उल्लेख्यानि सन्ति। (१) मोक्षमूलरकृतम् Vedic-Hymns, (२) ओल्डेनबर्गकृतम्- Vedic Hymns, (३) मैकडानल [Macdonell] कृतम्- A Vedic Reader for students, Hymns from the Rigveda, (४) थामस [E.C. Thomas] कृतम्- Vedic Hymns, (५) पीटर्सन (Peter Peterson) कृतम् Hymns from the Rigveda.

(घ) **ऋग्वेदीया: ब्राह्मणादिग्रन्था:- (१) प्रो. हाउग:** [M. Haug] ऐतरेय-ब्राह्मणं समपादयत्। आंग्लभाषानुवादं १८९३ ई० भागद्वये प्राकाशयत्। (२) **आउफ्रेष्ट:** ऐतरेयब्राह्मणस्य रोमनाक्षरेषु सायणभाष्यटिप्पण्यादियुक्तं संस्करणं १८७९ ई० प्राकाशत्। (३) **प्रो. लिन्डनर:** (B. Lindner) - कौषीतकि ब्राह्मणं १८८७ ई० संपाद्य **प्रकाशितवान्।** (४) **डा. कीथ:** (Keith) ऐतरेय-कौषीतकि-ब्राह्मणयो: आंग्लभाषानुवादम् अकरोत्। (५) **स्टेन्त्सलर:** (A.F. Stenzler) आश्वलायन-गृह्यसूत्रं प्राकाशयत्। (६) **हिलेब्राण्ट:**- शांखायन-श्रौतसूत्रं समपादयत्।

## (२) यजुर्वेद-संहिता

### (क) शुक्ल-यजुर्वेद:

**यजुर्वेदीया: संहिता: - (१) वेबर:** (Albrecht Weber)- शुक्ल-यजुर्वेदसंहिताया: महीधरभाष्य-संहितं संस्करणं १८४९-१८५३ ई० प्रकाशितवान्। यजुर्वेदीय-काण्व- शाखायाश्चापि संस्करणं १८५२ ई० प्राकाशयत्। (२) **ग्रिफिथ:**- शुक्लयजुर्वेदस्य १८९९ ई० आङ्ग्लभाषाया पद्यानुवादं व्यधात्।

**यजुर्वेदीया: ब्राह्मणग्रन्था:- (१) वेबर:** शतपथब्राह्मणस्य १८५५ ई० आलोचनात्मकं संस्करणं प्रकाशितवान्। अत्र सायणादीनां त्रयाणां टीका अपि सन्ति। (२) **केलेंड:** (W.Caland)- शतपथ-ब्राह्मणस्य, आङ्ग्लभाषायां प्रस्तावनायुक्तं संस्करणं प्रकाशितवान्। (३) **ईग्लिङ्ग: (J. Eggeling)** शतपथब्राह्मणस्य आंग्लभाषायाम् अनुवादं विधाय, बृहतीं भूमिकां च विलिख्य, **'सेक्रेड बुक्स आफ द ईस्ट सीरीज'** ग्रन्थमालायां पञ्चसु भागेषु प्राकाशयत्।

**बेबर:** कात्यायन-श्रौतसूत्रं १८५९ ईसवीये, **स्टेन्त्सलर:** च पारस्कर-गृह्यसूत्रं संपाद्य प्रकाशितवन्तौ।

### (ख) कृष्ण-यजुर्वेद:

**कृष्णयजुर्वेदीया: संहिता:- (१) वेबर:**- कृष्णयजुर्वेदीयां तैत्तिरीय-संहितां रोमनाक्षरेषु संपाद्य १८७१-७२ ई. प्राकाशयत्। स एव **मैत्रायणी**-संहितां १८४७ ई. संपाद्य प्रकाशितवान्। (२) **श्रेडर:** (L.V. Schroeder) मैत्रायणी-संहितां चतुर्भागेषु १८८१-१८८६ ई. प्रकाशितवान्। स एव काठक-संहिताम् अपि १९१० ई० प्राकाशयत्। (३) **कीथ:** (Keith)-तैत्तिरीय-संहिताया आङ्ग्लभाषायाम् अनुवादं १९१४ ई० प्रकाशितवान्। अत्र २०० पृष्ठानां वैदुष्यपूर्णा भूमिका।

**कृष्णयजुर्वेदीया: सूत्रग्रन्था: -**

(१) **केलेण्ड** (W.Caland) एष एतान् सूत्र-ग्रन्थान् संपाद्य प्रकाशितवान्। बौधायनं श्रौतसूत्रं धर्मसूत्रं, गृह्यसूत्रं च, काठक-गृह्यसूत्रम्, बाधूलसूत्रम्,

www.thearyasamaj.org

वैखानसगृह्यसूत्रं च। (२) **विन्टरनीत्सः** (M. Winternitz)- आपस्तम्बगृह्यसूत्र सम्पादयत्। (३) **गार्बे** (R.Garbe) आपस्तम्ब-श्रौतसूत्रं १८८१-१९०३ ई० प्राकाशयत्। (४) **क्नाउएरः** (F. Knauer)- मानवश्रौतसूत्रं प्राकाशयत्।

### (३) सामवेदसंहिता

**समवेदसंहिता**- (१) **स्टेवेन्सनः** (J. Stevenson)-सामवेदस्य राणायनीय-शाखायाः संस्करणम् आंग्लभाषानुवाद-सहितं सम्पादयत्। तच्च विल्सनः १८४३ ई प्रकाशितवान्। (२) **बेन्फे** (Benfey) कौथमशाखायाः सामवेदस्य संस्करण, जर्मनभाषानुवाद-सहितं, १८४८ ई. प्राकाशयत्। (३) **केलेण्डः**- जैमिनीय-शाखायाः सामवेदस्य संस्करणं रोमनाक्षरेषु १९०७ ई० प्राकाशयत्। अतिशुद्धम् इदं संस्करणम्। भूमिकायुक्तं चैतत्। (४) **ग्रिफिथः**- सामवेदस्य आंग्लभाषायां पद्यानुवादं १८८९ ई. वाराणसीतः प्राकाशयत्।

**सामेवदीय-ब्राह्मणग्रन्थाः** - (१) **वेबरः** - अद्भुत-ब्राह्मणम् जमर्नभाषानुवादसहितं १८५८ ई० प्रकाशयत्। एष वंशब्राह्मणम् अपि समपादयत्। (२) **बर्नेलः** (A.C. Burnell) अनेकसामवेदीयब्राह्मणानां सम्पादनम् अकरोत्। तानि सन्तिसामविधान-देवताध्याय-वंश-सहितोपनिषद्-आर्षेय-ब्राह्मणानि। (३) **एर्टलः** (H.Oerter)-जैमिनीय-उपनिषद्-ब्राह्मणस्य आंग्लभाषानुवाद-संहितं संस्करणं प्राकाशयत्। (४) **केलेण्डः** जैमिनीयब्राह्मणस्य जर्मन-भाषायाम् अनुवादं चक्रे। आर्षेय-ब्राह्मणं जैमिनीय-गृह्यसूत्रं च सम्पादयत्। (५) **स्टेन कोनो** (Sten Konow) सामविधान-ब्राह्मणस्य अनुवादञ्चकार। (६) **गास्ट्रा** (D.Gaastra)-जैमिनीय-गृह्यसूत्रस्य डच-भाषायाम् अनुवाद चकार। एष जैमिनीयश्रौतसूत्रम् अपि समपादयत्।

### (४) अथर्ववेद-संहिता

**अथर्ववेदसंहिता**- (१) **रोठःह्विटनी च** (Rudolph Roth, W.D. whitney) अथर्ववेदस्य शौनकीयां शाखां सम्पाद्य १८५६ ई० प्रकाशितवन्तौ। (२) **ब्लूमफील्डः गार्बे** च (M. Bloomfield, R. Garbe) अथर्ववेदस्य पैप्पलाद-शाखायाः काश्मीरतो जीर्णां प्रति प्राप्य फोटो-पद्धत्या तां प्रकाशितवन्तौ। (३) **केलेण्डः**- अथर्ववेद-संहिताया आलोचनात्मकं संस्करणं प्राकाशयत्। (४) **ग्रिफिथः**- अथर्ववेदस्य आंग्लभाषायां पद्यानुवादं १८९५-१८९८ ई० प्राकाशयत् (५) **ह्विटनी लैनमैनः** च (W.H. Whitney, C.R. Lanman) अथर्ववेदस्य आङ्ग्लाभाषायाम् अनुवादं भूमिका-टिप्पण्यादियुक्तं, १९०५ ई० प्रकाशितवन्तौ। (६) **ब्लूमफील्डः**- पैप्पलाद-संहिताया आंग्लभाषानुवादं १९०१ ई० प्रकाशितवान्।

**ब्राह्मणग्रन्थाः** (१) **गास्ट्रा**-गोपथब्राह्मणस्य संस्करणं १९१९ ई० प्रकाशितवान्। (२) **ब्लूमफील्डः**- अथर्ववेदीयं कौशिकसूत्रं १८९० ई. प्राकाशयत्।

### (५) विविध-ग्रन्थाः

अत्र केचन अतिमहत्त्वपूर्णा एव ग्रन्था उल्लिख्यन्ते-

(क) कोशग्रन्थाः- (१) **रोठः बाटलिंकः** च (R. Roth, Otto Bohtlingk) संस्कृत-जर्मन-भाषामयः सप्त-विशालकाय-भागेषु द्वयोरेतयोः महता श्रमेण प्रकाशितोऽभूत्। राठः वैदिकभागं संगृहीतवान्। **बाटलिंकः** च लौकिकसंस्कृतभागम्। (२) **ग्रासमानः**-

www.thearyasamaj.org

ऋग्वेदिक-कोशं प्राकशयत्। (३) **हिलेब्राण्टः** (Vedic Dictionary) वैदिक-कोश-ग्रन्थं ३ भागेषु प्राकाशयत् (४) **मैकडानलः कीथः** च- Vedic Index (वैदिक कोश) ग्रन्थं भागद्वये प्रकाशितवन्तौ। एष वेदाध्ययनार्थम् अत्युपयोगी कोशः। वैदिक-संस्कृत्याः संक्षिप्त-विश्वकोश-रूपेणास्ते।

**व्याकरण-ग्रन्थाः** - (१) **ह्विटनी** Sanskrit Grammar (संस्कृतव्याकरण) ग्रन्थम् अलिखत्। अत्र वैदिक-लौकिक-संस्कृतयोः द्वयोरपि व्याकरणं वर्तते। (२) **मैकडानलः** वैदिकव्याकरणे ग्रन्थद्वयम् अलिखत् - (क) Vedic Grammar, (ख) Vedic Grammar for Students ग्रन्थम् अरचयत्। स वैदिक-व्याकरणस्य पाणिनिः अस्ति। (३) **वाकरनागेल** (wackernagel) वैदिकव्याकरणस्य जर्मनभाषायां प्रौढं व्याकरणम् अरचयत्। सर्वोत्कृष्टोऽयं ग्रन्थो वैदिकव्याकरणस्य।

**छन्दोग्रन्थाः**- (१) **वेबरः**- 'इण्डिशे स्टुडिएन' ग्रन्थे वैदिक-छन्दसां विवेचनम् अकरोत्। (२) **आर्नोल्डः** (E.V. Arnold) वैदिकछन्दो-विषये 'Vedic Metre' ग्रन्थम् अरचयत्।

**सूचीग्रन्थाः** - (१) ब्लूमफील्डः Vedic concordance (मन्त्र-महासूची) नामकं ११०२ पृष्ठेषु विशालकायं ग्रन्थं १९०६ ई. प्राकाशयत्। स Rigveda Repetitions (ऋग्वेदे पुनरावृत्तयः) ग्रन्थमपि लिलेख।

(२) **कर्नल जैकबः** G.A. Jacob 'उपनिषद्-वाक्य-कोश' ग्रन्थं प्रणिनाय। (३) **लुईस रेनू** (Louis Renou) – Bibliographie Vedique (वैदिक वाङ्मय-ग्रन्थसूची, ग्रन्थं फ्रेंचभाषायां ९ भागेषु प्राकाशयत्)। अत्र वैदिकसाहित्य-विषयकाः सर्वे प्रकाशिताः ग्रन्थाः संगृहीताः सन्ति।

**वैदिक देवता-विज्ञानम्**- विषयेऽस्मिन् पाश्चात्त्यैः तुलानात्मकम् ऐतिहासिकं च विवेचनं कृतम्। विषयेऽस्मिन् मैक्समूलर-हिलेब्राण्ट-मैकडानल-प्रभृतीनाम् अनेके ग्रन्थाः सन्ति। (१) **हिलेब्राण्टः**- Vedische Mythologie वैदिकं देवशास्त्रम् ग्रन्थं जर्मन-भाषायां प्रणिनाय। (२) **मैकडानलः** Vedic Mythology – ग्रन्थं १८९७ ई. प्राकाशयत्। विषय-विवेचन-दृष्ट्या उत्तमोऽयं ग्रन्थः। (३) **कीथः** Religion and Philosophy of vedic and upanisad ग्रन्थे वैदिकं धर्म दर्शनञ्च सम्यग् व्यवेचयत्।

**वैदिक-साहित्येतिहास-ग्रन्थाः** - प्रमुखग्रन्थाः सन्ति- (१) **मैक्समूलरः**- History of the Ancient Sanskrit Literature, (२) **वेबरः**- History of Indian Literature (१८८२), (३) **मैकडानलः**- History of Sanskrit Literature (१९००), (४) **विन्टरनीत्सः** History of Indian Literture- मूलग्रन्थो भागत्रये जर्मनभाषायाम् आस्ते।

**विविधाः ग्रन्थाः** - केचन एवात्र निर्दिश्यन्ते। (१) **गोण्डः**- (J. Gonda) वैदिकविषये बहुमूल्यग्रन्थान् प्रणिनाय। तद् यथा - Stylistic Repetitions in the Veda (वेदेषु पुनरुक्तयः शैली-विज्ञानदृष्ट्या) Vision of the Vedic Poets (वैदिक-कवि-दर्शनम्), Epithets in Rigveda (ऋग्वेदे विशेषणानि), (२) **एलिजारेनकोवा** (Elizarenkova) रूसीभाषायां 'ऋग्वेदे लुङ्लकार-प्रयोगाः' इति ग्रन्थम् अलिखत्। (३) **ब्लूमफील्डः**- The Religion of the Veda, (४) **लुईस रेनूः**- फ्रेंच-भाषायां 'वेदेषु परोक्षभूतप्रयोगाः' इति ग्रन्थः लिखितः।

www.thearyasamaj.org

# ❁ यस्यच्छायाऽमृतम् ❁

-विद्यावाचस्पतिः **श्री रामदत्तशास्त्री**
पक्की सराय, अनूपशहर, बुलन्दशहरम् (उ.प्र.)

वैदिकवाङ्मयं हि नाम मानव-मात्रस्य कृते सुखशान्तिसमृद्धिपरिपोषकं पुष्टिवर्धनं मनोविकारापहारि सद्विचारसार-समुत्पादनपरं शश्वदात्माभ्युदयकारि जीवनज्योतिरादीप्तिकरम्। वैदिकवाङ्मयतरुर्हि नितरामच्छितो विततोऽहर्निशघनच्छाया-प्रदायी मधुरफलवान्, समभ्युपेतपरिश्रान्तजनमानस-शंकरोऽविरतविततितापपापहारी जगज्जीवातुरूपः। साम्प्रतम् अस्मद्देशे नवयूनां नवयुवतीनां च करेषु नापतति शमं शान्तिप्रदं सून्नतविचारवर्धकं तादृशं मङ्गलमयं स्वस्थं सत्साहित्यम्, यदधीत्यनवतरुणा नवतरुण्यश्चाविरतं कलुषितविचारधारानिमग्नाः सततं शृङ्गारभावजागरूकाः कामयमाना अपि सत्पथाध्वनीना न भवन्ति, प्रत्युत कलुषितभावभरितसाहित्या-धीतितत्परास्तथाविधाऽविरतचलचित्रजगद्दर्शन-संदीप्तकामवासनाऽनलास्तथाविधेष्वेवानिशं विचारेषु ब्रुडित-मानसा न कथमपि जीवनाभ्युदयाध्वानं लभन्ते।

## सत्यस्य पन्था विततो देवयानः

अयि भारतीया भ्रातरः! यदि यूयं वास्तविकं तथ्यं सुखमासदयितुं कामयध्वे तर्हि त्वरया विहाय विविधान् अवद्यानध्वनः कल्मषान्, भूयो वैदिकमार्गानुररीकुरुत। स एव सारभूतः सत्यो देवयानो महान् पन्थाः। इन्द्रियाणां दमनेन साधुना चेतसा चिन्तयत जन्ममरणापवर्गाय जीवनवैशद्याय वैदिकसंस्कृतिसम्पदम् अविरामोन्नतिपरां कापटिकजनजालनिर्मलगुर्वीम्। एष एव मार्गः सच्चिदानन्दस्वरूपस्य प्रभोः सम्मेलनाय सांसारिक-कष्टकलापापहाराय परमशान्तेरुपलब्धये च।

## पश्य देवस्य काव्यं न ममार न जीर्यति

भगवती श्रुतिः स्वयं वैदिकसाहित्यस्य संस्तवं कुरुते। ऋग्यजुस्सामाथर्वरूपं देवस्य परमात्मनः काव्यं कवित्वरूपं सार्वकालिकम्, यत्कदापि न जीर्णं भवति, न च म्रियते। एतत्काव्याध्ययनाध्यापनाभ्यामेव परमां शाश्वतिकी च शान्तिं यूयं यास्यथ। अयमेव सुखावहो दुःखापहाश्च मार्गः।

## नान्यः पन्था विद्यतेऽयनाय

भगवदाराधनं हि जीवनस्य परमं महत्त्वम्। यदि जगति विविधानि अनीकानि विजित्य विविधान् अरीन् संमर्द्य, धन-धान्य-विविधालङ्कारसम्भारभूतिं भव्यभावनायोगान् आसाद्य प्रचुरां मेदिनीं च विजित्य तादृशमानन्दम् उपलब्धासि सर्वमिदं क्षणिकं विनाशि च सुखम्। यद्येषु तथ्यं सुखमभविष्यत् तर्हि कथं धनधान्य-पूर्णजीवनाः जना आरण्यकाः संजाताः। सकलान् सांसारिकरागान् सांसरिकजनदृष्टौ सुखागारान् विहाय कथ मुनित्वमापन्नाः। कथं जनकादयो राजर्षयः स्वीयां समृद्धां राज्यसमृद्धिं परिहाय विपिन-वासिनोऽभूवन्। **'नाल्पे सुखमस्ति भूम्नि सुखम्।' 'यो वै भूमा तत् सुखम्।' 'भूमा वै परमैश्वरः।'** यजुंषि प्रतिपादितम्।●

www.thearyasamaj.org

**'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥ '** यः पुरि आत्मनि शरीरे वा शेते स पुरुषः परमेश्वरः, स महानस्ति, स आदित्यवर्णः अदितेः प्रकृतेरपत्यमादित्यः सूर्यः स हि तमसः विविधादज्ञानात् तमोगुण-गणाच्च परस्ताद् वर्तते। तमेव परमात्मानं विदित्वा मननशीलो जनो मृत्युं निधनम् अत्येति अतिक्रामति। **'नान्यः पन्था विद्यतेऽयनाय'** इतोऽपसृत्य प्रभोः प्राप्तये च अन्यो मार्गो न वर्तते। कठोपनिषदि आचार्य यमनचिकेतसोः **'तवैव वाहास्तव नृत्यगीतेः'** इति कथावतारेणापि सुस्पष्टमेव मार्गो व्याहृतः। यतो हि- **'अनित्यानि शरीराणि विभवो नैव शाश्वतः। नित्यं सन्निहितो मृत्युः, कर्तव्यो धर्मसंग्रहः॥**

नित्यमुखं परिहायानित्यानि सुखानि धनधान्यभोगविलासवनितादिसुखं नश्वर को मतिमान् मानवः प्राप्तुकामयिष्यते

**'इह चेद वेदीदथ सत्यमस्ति,**
**न चेदिहावेदीन्महती विनष्टिः',**

उपनिषदां साधु घोषणा विधीयते, यदि पुमानस्मिन् मानवजन्मनि तस्य जगन्निर्मातुः सच्चिदानन्दस्वरूपस्याजस्य जगदीश्वरस्य सत्स्वरुपमस्मिन् मनुष्यजन्मनि जानाति तर्हि सत्यं शोभनं यतो हीदं मानवजन्म परमपुण्यैरासाद्यते, मनुजयोनावेव सकलानि सत्कर्माणि संचेतुं जनोऽर्हति, यदि तु नात्र योनावपि स प्रभुं पितरं वेत्तुं नालङ्कर्मिणोऽभूत् तर्हि जीवनस्यास्यापि महती विनष्टिः विनाशः। अतः प्रभोः शरणमेव जीवन-प्रदम् अमृतम्। तस्यैव छाया कृपावाऽभीष्टा वर्तते।●

# ❋ ऋषिदयानन्दः ❋

-आचार्यः सन्दीपकुमारत्यागी 'दीपः'
योगविभागाध्यक्षः
जॉर्जियन कालेज ओरेंजविल
टोरण्टो(कनाडा)

(१)

शिवालयं शिवरात्रौ दर्शनाय शङ्करस्य,
मूलशङ्करो जगाम सह परिवारेण।
निशीथे प्रसुप्ताः सर्वे नास्वपीत् स व्रतधारी,
आश्चर्यचकितोऽभूत् आखूनां प्रवेशेन॥

(२)

शिवलिङ्गोपरि यदा अक्षतानि भक्षितानि,
त्यक्तानि मलमूत्राणि तैस्तस्य जड़त्वेन।
तदा तस्य बालकस्य हृदि जातो विचारोऽयम्,
शिवोऽयमसत्यमस्ति गुणेन, स्वभावेन॥

(३)

ततश्च विहाय गृहं सच्छिवस्यान्वेषणार्थम्,
बभ्राम स तीर्थे-तीर्थे शैलेषु वने-वने।
स्वोद्देश्यमपूर्णं ज्ञात्वा प्रविश्य सन्यासाश्रमे,
सांसारिक-सर्वभोगान् त्यक्त्वा पूर्ण-यौवने॥

(४)

गुरुविरजानन्दस्यादेशं पालयितुं पपौ,
हालाहलं दयानन्दोऽनेकदा स्वजीवने।
तस्योपदेशमासीद्यदीश्वरः सदा रमते,
कणे-कणे, जने-जने विजने त्रिभुवने ॥

www.thearyasamaj.org



# ❋ वेदस्यास्ति विशेषतत्त्वमहिमा ❋

-श्री वासुदेवपाण्डेय:, व्याकरण-साहित्याचार्य:,
पूर्वप्राचार्य:, संस्कृतमहाविद्यालय:,
भवानी छापर, देवरिया (उ.प्र.)

(१)

सम्यग् बुद्धिविवर्द्धनाय जनतासन्मानसे साम्यता,
वादोद्धावनहेतवे च गुरवो वेदा: समेऽनादय:।
वर्तन्ते भुवि मानवीयजडतातापत्रयोन्मूलने,
दीक्षादाननिमित्तशासनगुणालङ्कारसम्भूषिता:॥

(२)

कोटीन्दुश्रितकान्तिमध्यविलसद् यद् ब्रह्मनिष्ठं मह-
ज्ज्योतिश्चक्रमितश्च सृष्टिविधये जातो विधाता हरि:।
रक्षार्थञ्च लयस्वभावसमित: श्रीशङ्करश्चोत्तम-
श्चैते ब्रह्मनिविष्टतत्त्वगुणिनो वेदात्मसिद्धेश्वरा:॥

(३)

वेदप्रेरणया चराचरगुरुर्निर्माणशक्त्या युतो,
ब्रह्मालोकपितामहोऽपि सततं विष्णुर्जगद्-रक्षक:।
देवेषूत्तमशङ्करश्च सहसा स्वेच्छालयोद्धावको।
ब्रह्माण्डावनितत्परा हि जगतां मातेश्वरी चाम्बिका॥

(४)

वेदादेव समर्चकं जन-मन: सत्त्वात्मकं सम्भव-
त्सर्वाङ्गीणसुनीतिरीतिविधिना विद्वेषभावं तम:।
दूरीकृत्य शुभोदयाय जगति प्रोद्धाव्य चैकं मतं,
साम्यत्वे सति दिव्यसौख्यमपरं लब्ध्वा चिरं मोदते॥

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदय: (संस्कृत-मासिकम्)
P.O. गुरुकुलकाङ्गड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्,
श्री......................................................

(५)

वेदेनैव वयं महत्त्वपदवीं लब्ध्वा निरातङ्किता,
वेदे नैव हि यज्ञधूमसहित: पूत: सुगन्धान्वित:।
वायुर्वाति च वेदमन्त्रसहितैर्यज्ञै: सुवृष्टिप्रदा,
मेघास्तेन हि लब्धजीवनधनानन्देन युक्ता जना:॥

(६)

उर्ध्वं मूलमध: सुशाखमपरं छन्दांसि पत्राण्यथो,
साश्चर्योत्तमशक्तिनिष्ठमतुलं संसारवृक्षं प्रभुम्।
तं वेदं भगवन्तमेव नितरां ज्ञात्वा त्रिदेवा: परं,
तत्प्रोक्तोक्ति-वचो निशम्य सततं सृष्ट्यादिकार्ये रता:॥

मुद्रकेण, प्रकाशकेन डॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते 'न्यू जे.एन. स्टेशनरी मार्ट' नामके मुद्रणालये मुद्रापयित्वा **'भारतोदय:'** मासिकं पत्रं प्रकाश्यं नीतं हरिद्वार-स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया। **सम्पादक: डॉ. हरिगोपालशास्त्री**